आचार्यपरम्परायै समर्पितम्



अथाधिविद्यम्।

आचार्यः पूर्वरूपम्। अन्तेवास्युत्तररूपम्। विद्या सन्धिः। प्रवचनं सन्धानम्।

इत्यधिविद्यम्।

तैत्तिरीयोपनिषद्, शिक्षावल्ली, तृतीयानुवाकः

कृतज्ञताविष्करणम्

संस्कृतभाषायाः तच्छास्त्राणाञ्च अधिगमपरिणाम-आधारितपाठ्यचर्यारूपरेखायाः (LOCF) निर्माणे संलग्नानां विभिन्नानां समितीनां च कृते हार्दिकीं कृतज्ञतां प्रकटयामः।

पारम्परिकसंस्कृतज्ञानपरम्पराणां समकालीनशैक्षणिकमानकैः सह समन्वयने बहुमूल्यविचारं विद्वद्योगदानञ्च दत्तवत्यै तथा निरन्तरप्रयासं कृतवत्यै विश्वविद्यालय-अनुदान-आयोगस्य (UGC) संस्कृतभाषायाः अधिगमपरिणाम-आधारितपाठ्यचर्यारूपरेखासमित्यै, पाठ्यचर्याविकाससमित्यै, समन्वयसमित्यै च विशेषतया कृतज्ञाः स्मः।

विश्वविद्यालय-अनुदान-आयोगेन (UGC) तथा UGC LOCF सञ्चालनसमित्याः अध्यक्षाभिः समये समये पाठ्यचर्यायाः गुणवत्तावर्धनाय एवं तस्याः प्रासंगिकतां च सुनिश्चेतुम् अपेक्षितं मार्गदर्शनं साहाय्यं च विहितं वर्तते। तदर्थं हार्दिकीं कृतज्ञताम् आविष्कुर्मः।

एतस्याः रूपरेखायाः निर्माणे संशोधने च स्ववैदुष्यम् उपयुज्य निर्दिष्टायाः पाठ्यचर्यायाः सम्पादने परामर्शदातृभ्यः पाठ्यचर्यानिर्मातृभ्यः च समेभ्यः विद्वद्भ्यः, शिक्षाविद्भ्यः, समीक्षकेभ्यः च हार्दिकीं कार्तज्ञ्यपरम्परां विनिवेदयामः।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य सहयोगेन अस्याः ***अ.प.पा.रूपरेखायाः*** निर्माणमभवत्।

Acknowledgement

We express our sincere gratitude to the various committees involved in the preparation of the Learning Outcomes-based Curriculum Framework (LOCF) in Sanskrit and its Shastras.

We are especially thankful to the UGC LOCF Committee (Sanskrit), Curriculum Development Committee, and the Coordination Committee for their valuable insights, scholarly contributions and tireless efforts in aligning traditional Sanskrit knowledge systems with contemporary academic standards.

We also acknowledge the guidance and support provided by the University Grants Commission (UGC) and Chairperson, UGC Steering committee, LOCF, in facilitating collaborative academic discourse and ensuring the quality and relevance of the curriculum. Our heartfelt thanks go to all scholars, educators and reviewers who participated in the consultative processes, contributing their expertise to enrich this framework.

This ***LOCF*** is prepared with the assistance of ***Central Sanskrit University.***

UGC LOCF Committee (Sanskrit)

Prof. Shrinivasa Varakhedi

Chairperson of the committee and Vice-Chancellor, Central Sanskrit University, New Delhi – 110058 ✉ vc@sanskrit.nic.in

Prof. Sukant Kumar Senapati

Vice-Chancellor, Shri Somnath Sanskrit University, Veraval, ✉ sukantsnpt@gmail.com

Prof. Viroopaksha V. Jaddipal

Secretary, Maharishi Sandipani Rashtriya Ved Vidya Pratishthan, Ujjain,

✉ vvjaddipal@gmail.com

Dr. M. V. Natesan

(Retd. Prof.) SSV Kaladi, Kailash Nagar Kolazhy, Biyur, Trichur-10,

✉ natesanskt2000@gmail.com

Dr. Mamta Tripathi

Assistant Professor, Gargi College, University of Delhi, Delhi, ✉ mamtatripathi.jnu@gmail.com

Co-ordination Committee

Dr. G. Surya Prasad

Chief Co-ordinator of the committee and Asst. Professor, Central Sanskrit University, New Delhi – 110058, ✉ dr.gsurya.prasad@csu.co.in

Dr. Awasthi Sailesh Kumar

Asst. Professor Grade, Central Sanskrit University, New Delhi, ✉ dr.awasthisailesh@csu.co.in

Dr. Kishor Kumar

Asst. Professor Grade, Central Sanskrit University, New Delhi, ✉ dr.kishor_kumar@csu.co.in

Dr. Deepika Dixit

Asst. Professor Grade, Central Sanskrit University, New Delhi, ✉ dr.deepikadixit@csu.co.in

प्रो. श्रीनिवासः वरखेडी
कुलपतिः
Prof. Shrinivasa Varakhedi
Vice-Chancellor

केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
Central Sanskrit University
Established by an Act of Parliament

CSU/VC-002/2025-26/92

Date – 18.06.2025
आ.कृष्णसप्तमी, वि.सं. 2082

Foreword

Sanskrit For Future

It is a matter of immense pride and privilege to present the Learning Outcomes-Based Curriculum Framework (LOCF) for Sanskrit and its Shastras, developed under the aegis of the University Grants Commission (UGC). This initiative marks a landmark in the history of Sanskrit education, providing a structured, learner-centric, and globally aspirational curriculum that aligns harmoniously with the transformative vision of the National Education Policy (NEP) 2020.

Sanskrit is not merely a language; it is a rich source of knowledge and a discipline of many disciplines. It is a gateway to India's vast, time-tested knowledge systems (IKS), embracing philosophy, science, linguistics, mathematics, and artistic expression. This LOCF encapsulates the grandeur of Sanskrit's intellectual traditions while addressing the dynamic demands of contemporary higher education.

The primary objective of this curriculum is to make Sanskrit an aspirational discipline for the youth of today, instilling a deep understanding of its rich intellectual traditions while applying its knowledge to solve contemporary problems. It seeks to empower young learners not only to appreciate their linguistic and cultural heritage but also to utilise Sanskrit's unique perspectives to innovate and contribute to fields such as education, technology, health care, environmental sustainability, legal studies and governance.

This framework has been meticulously designed by a large team of scholars who collectively contributed to nearly 800 courses across 5 streams Majors, Minors, Multi-Disciplinary, Skill Enhancement, and Value-Added to provide flexible academic pathways. It aims to produce graduates who are proficient in classical knowledge, equipped with modern skills and able to act as a bridge between India's rich past and its future aspirations.

Additionally, this framework encourages the importance of Sanskrit as a medium of instruction to achieve Sanskrit teaching in Sanskrit. It promotes for the use of Simple Standard Sanskrit in classrooms, thereby strengthening the linguistic skills and deepening understanding of the discipline. It bridges the timeless wisdom enshrined in Sanskrit texts with the technological innovations of the modern era, fostering employability, critical thinking, interdisciplinary engagement, and research aptitude among learners.

I am grateful to the distinguished members of the UGC-constituted LOCF Committee, the sub-committees across all Sanskrit disciplines, the Co-ordination Committee, and all dedicated scholars and educators who contributed their expertise in crafting this comprehensive framework.

Let this framework inspire a new generation of learners and thinkers, rooted in tradition, equipped for innovation, and prepared to lead responsibly in the ever-evolving world.

Shrivara

(Prof. Shrinivasa Varakhedi
Chairperson, UGC LOCF Committee (Sanskrit)
Vice-Chancellor, Central Sanskrit University, New Delhi

56-57, सांस्थानिक क्षेत्र, जनकपुरी, नई दिल्ली-110058 (भारत)
56-57, Institutional Area, Janakpuri, New Delhi-110058 (INDIA)
(O) 011-28523949 www.sanskrit.nic.in
vc@sanskrit.ac.in / vicechancellor@csu.co.in

अस्याः कार्यक्रमरूपरेखायाः प्राथमिकविवरणानि

एषा संस्कृतस्य संस्कृतशास्त्राणाञ्च स्नातकोत्तरकार्यक्रमाणाम् अधिगमपरिणाम-आधारितपाठ्यचर्यारूपरेखा त्रिधा प्रस्तूयते -

1. ***परिचयः।***
2. ***प्रथमभागः (संस्कृतस्य संस्कृतशास्त्राणाञ्च विभिन्नस्नातकोत्तरकार्यक्रमाः)***
3. ***द्वितीयभागः (शोधसम्बद्धाः पाठ्यक्रमाः)***

परिचये संस्कृते संस्कृतशास्त्रेषु च एकवर्षीय-स्नातकोत्तरकार्यक्रमाणां कृते पाठ्यक्रमः श्रेयोऽङ्करूपरेखा च, राष्ट्रियशिक्षानीतेः (२०२०) स्नातकोत्तरशिक्षया सम्बद्धानि अनुशंसनानि, स्नातकोत्तरपाठ्यचर्यारूपरेखायाः प्रमुखविशेषताः इत्यादयः परिचयात्मकविषयाः विमृष्टाः।

प्रथमभागे संस्कृतस्य संस्कृतशास्त्राणाञ्च विभिन्नस्नातकोत्तरकार्यक्रमाणां पाठ्यक्रमाः प्रस्तुताः सन्ति। एतेषु सर्वेषु कार्यक्रमेषु प्रधानाः पाठ्यक्रमाः (Major Courses), चितस्वशास्त्रविषयकाः (Discipline Specific Elective Courses) पाठ्यक्रमाश्च सन्ति। एते पाठ्यक्रमाः क्रमशः अधोलिखितरूपेण अस्यां कार्यक्रमरूपरेखायां प्रदर्श्यन्ते -

- **प्रधानः पाठ्यक्रमः (Major) 1.1**
- **चितस्वशास्त्रविषयाः (DSE) 1.क.1**

प्रधानेषु पाठ्यक्रमेषु कश्चन कूटाङ्कः, यथा - 1.1, 2.1 इति रूपेण दत्तः। एतस्मिन् कूटाङ्के प्रथमसङ्ख्या कार्यक्रमस्य सत्रार्धं सूचयति, द्वितीयसङ्ख्या पाठ्यक्रमसङ्ख्याञ्च सूचयति।

पुनश्च चितस्वशास्त्रविषयकाणां पाठ्यक्रमाणां कूटाङ्के अक्षरस्यापि योजनं, यथा - 1.क.1 इति रूपेण कृतम्। एतादृशः सङ्ख्या-अक्षरसंवलितकूटाङ्कः (Alpha Numeric) वैकल्पिकं पाठ्यक्रमं सूचयति। अत्रापि प्रथमसङ्ख्या कार्यक्रमस्य सत्रार्धं, द्वितीयसङ्ख्या पाठ्यक्रमसङ्ख्याञ्च सूचयति। "क" इति अक्षरम् वैकल्पिकपाठ्यक्रमं सूचयतीति फलति। एतद्द्वयम् अतिरिच्य अन्येषु पाठ्यक्रमेषु वर्तमाना सङ्ख्या क्रमसङ्ख्यामात्रं सूचयतीति ज्ञातव्यम्।

द्वितीयभागे शोधविधिसम्बद्धाः (Research Methodology Courses) पाठ्यक्रमाः प्रस्तुताः सन्ति। एते पाठ्यक्रमाः सर्वेषामपि संस्कृतसम्बद्धानां स्नातकोत्तरकार्यक्रमाणां कृते समानाः भवन्ति। एते पाठ्यक्रमाः अधोलिखितरीत्या प्रदर्श्यन्ते -

- **शोधविधिसम्बद्धाः पाठ्यक्रमाः - RM 1**

शोधविधिसम्बद्धेषु पाठ्यक्रमेषु दत्ता सङ्ख्या क्रममात्रं सूचयति इति ज्ञातव्यम्।

विषयसूची

The contents are hyperlinked. Click on/touch the desired content to see.

परिचयः

संस्कृते संस्कृतशास्त्रेषु च एकवर्षीय-स्नातकोत्तरकार्यक्रमाणां कृते पाठ्यक्रमः श्रेयोऽङ्करूपरेखा च

(राष्ट्रियशिक्षानीतिः (२०२०) विश्वविद्यालय-अनुदान-आयोगः इत्यनयोः निर्देशानुसारम्)

भारतं तीव्रगत्या वर्द्धमाना ज्ञानाधारिता एका अर्थव्यवस्था वर्तते यत् तादृशीमेकां सशक्ताम् उच्चशिक्षाव्यवस्थामपेक्षते यत्र ज्ञानार्जनेन सह अनुसन्धानस्य नवाचाराः अपि प्रोत्साहिताः स्युः। राष्ट्रियशिक्षानीतिः (२०२०) अस्यां दिशि एकं दूरदर्शिनं दृष्टिकोणं प्रस्तौति, यत्र बहुशास्त्रीयाध्ययने (Multidisciplinary Learning), परिणामाधारितपाठ्यक्रमे, नमनीय-कार्यक्रमसंरचनासु च बलं प्रदत्तं वर्तते।

एतद्दृष्टिकोणानुरूपं, विश्वविद्यालयानुदानायोगः (UGC) एकां नूतनाम् एकवर्षीयां स्नातकोत्तरकार्यक्रमरूपरेखां परिचाययति, या विशिष्य तादृशेभ्यः अध्येतृभ्यः समुपयुक्ता वर्तते यैः प्रतिष्ठया अथवा अनुसन्धानेन सह प्रतिष्ठया (Honours or Honours with Research) सह चतुर्वर्षीयस्नातककार्यक्रमः समापितः। इयं रूपरेखा शैक्षणिकगहनतायाः, शोधाभिवृत्तेः, आजीविका-सम्बद्ध-नमनीयतायाः, भारतीयज्ञानपरम्परायाः एकीकरणस्य च महत्त्वं द्योतयति।

संस्कृतस्य संस्कृतशास्त्रीयपरम्परायाः च अध्ययनं भारतीयसभ्यतायाः बौद्धिकी आधारशिला वर्तते। राष्ट्रियशिक्षानीतेः (२०२०) परिवर्तनकारिदृष्ट्यनुरूपं, विश्वविद्यालयानुदानायोगेन संस्कृते संस्कृतशास्त्रेषु च नमनीयानां, शोधसम्पृक्तानां, परिणामाधारितानाञ्च एकवर्षीयस्नातकोत्तरकार्यक्रमाणां कृते पुनारचितपाठ्यचर्या, श्रेयोऽङ्कप्रारूपं च निर्मितम्।

गभीरविद्वत्ता, शैक्षणिकनवाचारः, अन्तश्शास्त्रीयसमन्वयः (Interdisciplinary Synthesis) इत्यादीनां माध्यमेन भारतस्य पारम्परिकज्ञानप्रणालीनां पुनर्जीवनम् एतेषां कार्यक्रमाणाम् उद्देश्यं वर्तते।

राष्ट्रियशिक्षानीतेः (२०२०) स्नातकोत्तरशिक्षया सम्बद्धानि अनुशंसनानि

स्नातकोत्तरशिक्षया सम्बद्धानि राष्ट्रियशिक्षानीतेः प्रमुखानुशंसनानि इत्थं सन्ति -

- ❖ चतुर्वर्षीयस्नातकाध्येतॄणां (बी.ए. ऑनर्स्/अनुसन्धानम्) कृते एकवर्षीयः स्नातकोत्तरकार्यक्रमः स्यात्।
- ❖ त्रिवर्षीयस्नातककार्यक्रमे उत्तीर्णानां कृते द्विवर्षीयः स्नातकोत्तरकार्यक्रमः स्यात्।
- ❖ शैक्षणिकप्रगतेः निरन्तरतायै समेकित-पञ्चवर्षीयः स्नातककार्यक्रमः/स्नातकोत्तरकार्यक्रमः स्यात्।
- ❖ कृत्रिमबुद्धिमत्ता (AI), स्वास्थ्यसंरक्षणं, विधिशास्त्रं, कृषिः, प्राकृतिकभाषाप्रक्रिया (NLP), पाण्डुलिपिविज्ञानं, तुलनात्मकदर्शनम् इत्यादिभिः अन्तःशास्त्रीयक्षेत्रैः (Interdisciplinary Fields) सह साहित्य-व्याकरण-वेद-ज्योतिष-दर्शनादिपारम्परिकविषयान् अन्तर्भाव्य अन्तश्शास्त्रीयाध्ययनस्य कृते अवसराः (Interdisciplinary Scope) प्रदीयन्ते।
- ❖ राष्ट्रिय-उच्चशिक्षायोग्यतारूपरेखायाः (NHEQF) अन्तर्गतत्वेन सूचितानाम् अधिगमपरिणामानां प्राप्तिः।
- ❖ मूल्याकलनाय, श्रेयोऽङ्कनिर्धारणाय, अधिगमस्य स्थानान्तरणाय च राष्ट्रियश्रेयोऽङ्करूपरेखया (NCrF) सह संरेखणम् (Aligning)

❖ आधुनिकशिक्षणोपकरणैः सह शास्त्रीयविशेषज्ञतायाः एकीकरणम्।

स्नातकोत्तरपाठ्यचर्यारूपरेखायाः प्रमुखविशेषताः

स्नातकोत्तरपाठ्यचर्यारूपरेखायाः प्रमुखविशेषताः अधोलिखिताः सन्ति -

➢ स्नातकस्तरे स्वीकृते प्रधानविषये गौणविषये वा स्नातकोत्तरकार्यक्रमं कर्त्तुमवसरः विद्यते। पुनश्च प्रतियोगिपरीक्षामाध्यमेन प्रवेशपरीक्षाद्वारा वा पूर्णतः नूतनविषये (अध्ययनशाखायां) स्नातकोत्तरकार्यक्रमं कर्त्तुमपि अवसरः विद्यते।

➢ शैक्षणिकश्रेयोऽङ्ककोषमाध्यमेन (ABC) श्रेयोऽङ्कमान्यतया सह प्रवेश-निर्गमप्रणाल्याः व्यवस्था विद्यते।

➢ सद्यस्काधिगमः (Online), मुक्तदूरस्थाधिगमः (ODL), सद्यस्क-औपचारिकाधिगमयोः मिश्रिताधिगमः (Hybrid) इत्यादीनां विभिन्नमाध्यमानां व्यवस्था विद्यते।

➢ प्रासङ्गिककार्यानुभवस्य श्रेयोऽङ्कनिर्धारणं कृत्वा, तस्य अनुभवस्य च शैक्षणिकमान्यतापि दीयते।

➢ बहुशास्त्रीयशिक्षायाः कौशलाधारितशिक्षायाः च कृते अवसराः प्रकल्प्यन्ते।

➢ राष्ट्रियोच्चशिक्षायोग्यतारूपरेखायाः (NHEQF) 6.5 स्तरेण सह संयोजिता अधिगमपरिणामाधारितपाठ्यचर्यारूपरेखा (LOCF) अनुपाल्यते।

➢ शास्त्रविमर्शः, पाठालोचनं (Textual Criticism), शोधप्रबन्धः इत्यादिमाध्यमैः अनुसन्धानोन्मुखता सुनिश्चीयते।

स्नातकोत्तरकार्यक्रमः - योग्यता प्रवेशश्च

❖ संस्कृते, कस्मिंश्चित् शास्त्रीयविषये वा न्यूनतमैः 160 श्रेयोऽङ्कैः सह चतुर्वर्षीयस्नातकप्रमाणपत्रभाजः (ऑनर्स्/अनुसन्धानेन सह ऑनर्स्) स्नातकोत्तरकार्यक्रमे प्रवेष्टुं अर्हन्ति।

❖ संस्कृतेतर-अध्ययनशाखाध्येतॄणाम् अङ्कानामाधारेण, विश्वविद्यालयस्य प्रवेशपरीक्षामाध्यमेन वा प्रवेशः।

❖ दर्शनं, भाषाविज्ञानं, भारतीयविद्याऽध्ययनम् (Indology) इत्यादिविषयेभ्यः अपि संस्कृते संस्कृतशास्त्रेषु च स्नातकोत्तरकार्यक्रमं कर्तुम् अन्तश्शास्त्रीयप्रवेशानुमतिः प्रदीयते।

स्नातकोत्तरकार्यक्रमस्य अधिगमस्य उद्देश्यानि

स्नातकोत्तरकार्यक्रमस्य संस्कृतपाठ्यचर्यायाः कानिचन सामान्योद्देश्यानि एवं सन्ति -

- ❖ संस्कृतपाठ्यचर्यायाम् अन्तःशास्त्रीयाधिगमं समावेश्य समग्रविकासस्य प्राप्तिः, संस्कृतस्य सांस्कृतिकपारम्परिकमूलानां च रक्षणपुरस्सरम् आधुनिकोपहूतीनाम् आत्मसात्करणाय छात्रसज्जा।
- ❖ संस्कृतपाठ्यचर्यायाम् आधुनिक-अनुसन्धानवैज्ञानिकप्रौद्योगिकविधीनां समावेशं कृत्वा छात्राणां शोधाभिक्षमतायाः वर्धनम्।
- ❖ पारम्परिकसंस्कृताध्ययनस्य तथा समकालीनक्षेत्राणां (यथा कृत्रिमबुद्धिमत्ता (AI), दर्शनशास्त्रं, भाषाविज्ञानम्, इतिहासः, भारतीयज्ञानपरम्परा (IKS) चेत्यादीनां) मध्ये अन्तरस्य पूरणम्।
- ❖ आजीवनाधिगमं संवर्धयितुं नमनीयतायुक्तशैक्षणिकमार्गाणां कल्पनं, अनुसन्धानाय उपयुक्तानां कौशलानामुन्नयनं, समस्यासमाधानाभिक्षमतायाः वर्धनम्।
- ❖ सामाजिक-आर्थिकविषमताः निवार्य विभिन्नसामाजिकपृष्ठभूमिवतां छात्राणां शैक्षिकावसरान् पूरयितुम् उद्दिष्टानां समावेशिशिक्षा-वैविध्यपूर्णशिक्षा-वैकल्पिकशिक्षाणां माध्यमेन समतायाः शिक्षासौलभ्यतायाः (Equity and Accessibility) सुनिश्चयः।
- ❖ क्षमताधारिताधिगमे विशिष्टं ध्यानं, यच्च वैश्विकज्ञाननिधिं स्वाधिगमपरिवेषे उपयोक्तुं, संस्कृतज्ञानस्य वास्तविकजगति अनुप्रयोगं कर्तुं तथा समीक्षात्मकचिन्तनं च वर्धयितुं प्रेरयति।

स्नातकोत्तरगुणाः अधिगमपरिणामाश्च (NHEQF इत्यस्य 6.5 स्तरानुरूपम्)

राष्ट्रियोच्चशिक्षायोग्यतारूपरेखायाः 6.5 स्तरानुसारं, स्नातकोत्तराः छात्राः -

- ❖ संस्कृतस्य संस्कृतशास्त्राणाञ्च गभीरावगमं प्रदर्शयिष्यन्ति।
- ❖ स्वीये क्षेत्रे अग्रिमावबोधनस्य मौलिकतायाः च प्रदर्शनं करिष्यन्ति।
- ❖ नूतनेषु सन्दर्भेषु बहुशास्त्रीयसन्दर्भेषु च क्लिष्टसमस्याः समाधास्यन्ति।
- ❖ नैतिकचिन्तनं सामाजिकरूपेणोत्तरदायिचिन्तनञ्च प्रदर्शयिष्यन्ति।
- ❖ विद्वद्भिः सामान्यजनसमुदायेन च सह प्रभावपूर्णं संवादं करिष्यन्ति।
- ❖ आत्मनिर्देशानुरूपम् आजीवनम् अधिगमाय प्रयतन्ते तथा शैक्षणिकप्रगतये अनुसन्धानप्रगतये च कार्यं करिष्यन्ति।
- ❖ समसामयिकसमस्याः समाधातुं प्राचीनभारतीयज्ञानमीमांसायाः अनुप्रयोगं तुलनां च करिष्यन्ति।
- ❖ पाण्डुलिपीनाम् अनुवादं, व्याख्यां, समीक्षात्मकं सम्पादनं च करिष्यन्ति।
- ❖ शास्त्रसंरेखणार्थं, शास्त्रव्याख्यानार्थं च संस्कृतसङ्गणकीयोपकरणानि प्रयोक्ष्यन्ति।
- ❖ सांस्कृतिकसंरक्षणे नीतिनिर्माणे च योगदानं विधास्यन्ति।

स्नातकोत्तरकार्यक्रमस्य पाठ्यचर्यासंरचना श्रेयोऽङ्कविभाजनञ्च
(Curricular Structure)


विश्वविद्यालय-अनुदानायोगेन स्नातकोत्तरकार्यक्रमस्य त्रीणि पाठ्यचर्याप्रारूपाणि निर्धारितानि तथैव श्रेयोऽङ्कविभाजनञ्च सूचितम्। तच्च अधः प्रदर्श्यते -

- **संरचना 'क'** - केवलं कोर्सवर्क् कार्यक्रमः एव (Course Work)
- **संरचना 'ख'** - केवलम् शोधकार्यक्रमः एव।
- **संरचना 'ग'** - कोर्सवर्क् कार्यक्रमस्य शोधकार्यक्रमस्य च संयुक्तरूपं (प्रत्येकं 20 श्रेयोऽङ्काः)

स्नातकोत्तरकार्यक्रमस्य श्रेयोऽङ्कविभाजनम्
(Credit Distribution)

विकल्पः	कोर्सवर्क् कार्यक्रमस्य श्रेयोऽङ्काः	शोधकार्यक्रमस्य श्रेयोऽङ्काः	आहत्य श्रेयोऽङ्काः
क	40	–	40
ख	–	40	40
ग	20	20	40

चतुर्वर्षीयस्नातककार्यक्रमस्य समाप्त्यनन्तरम् एकवर्षीयस्नातकोत्तरकार्यक्रमस्य रूपरेखा (4+1)



संरचना ‘क’

(स्तरः - 6.5): केवलं कोर्सवर्क् कार्यक्रमस्य स्नातकोत्तरपाठ्यचर्यासंरचना

सत्रार्द्धः	प्रधानपाठ्यक्रमः	वैकल्पिकः पाठ्यक्रमः	श्रेयोऽङ्कद्वयस्य पाठ्यक्रमः	लघुशोधप्रबन्धः/ शैक्षणिकपरियोजना / उद्यमिता	आहत्य श्रेयोऽङ्काः
प्रथमसत्रार्द्धः	प्रधानः 1 प्रधानः 2 (श्रेयोऽङ्काः 8)	वैकल्पिकः 1 वैकल्पिकः 2 वैकल्पिकः 3 (श्रेयोऽङ्काः12)	कौशलाधारितपाठ्यक्रमः/ कार्यशाला/ विशिष्टप्रयोगशाला/ प्रशिक्षुतासेवा/ शिक्षुता/ प्रायोगिकाधिगमः। (श्रेयोऽङ्काः 2)	-	**22**
द्वितीयसत्रार्द्धः	प्रधानः 3 प्रधानः 4 (श्रेयोऽङ्काः 8)	वैकल्पिकः 4 वैकल्पिकः 5 वैकल्पिकः 6 (श्रेयोऽङ्काः 12)	कौशलाधारितपाठ्यक्रमः/ कार्यशाला/ विशेषप्रयोगशाला / प्रशिक्षुतासेवा / शिक्षुता / प्रायोगिकाधिगमः। (श्रेयोऽङ्काः 2)	-	**22**

संरचना ‘ख’

(स्तरः 6.5): कोर्सवर्क् कार्यक्रमशोधकार्यक्रमयोः

स्नातकोत्तरपाठ्यचर्यासंरचना

सत्रार्द्धः	प्रधानपाठ्यक्रमः	वैकल्पिकः पाठ्यक्रमः	पाठ्यक्रम-श्रेयोऽङ्काः 2	लघुशोधप्रबन्धः/ शैक्षणिकपरियोजना / उद्यमिता	आहत्य श्रेयोऽङ्काः
प्रथमसत्रार्द्धः	प्रधानः 1 प्रधानः 2 (श्रेयोऽङ्काः 8)	वैकल्पिकः 1 वैकल्पिकः 2 अथवा सा. वै. (GE-3)* (श्रेयोऽङ्काः 8)	-	विस्तृतपरिणामान् अधः पश्यन्तु। (श्रेयोऽङ्काः 6)	**22**
द्वितीयसत्रार्द्धः	प्रधानः 3 प्रधानः 4 (श्रेयोऽङ्काः 8)	वैकल्पिकः 3 वैकल्पिकः 4 अथवा सा. वै. (GE-4)* (श्रेयोऽङ्काः 8)	-	विस्तृतपरिणामान् अधः पश्यन्तु। (श्रेयोऽङ्काः 6)	**22**

*ये ‘**उद्यमिता**’पटलं विकल्पत्वेन चिन्वन्ति तैः प्रथमद्वितीयसत्रार्द्धयोः उद्यमितासम्बद्धः एकः सामान्यवैकल्पिकविषयः (GE) अध्येतव्यः। ये लघुशोधप्रबन्धं शैक्षणिकपरियोजनालेखनं वा विकल्पत्वेन चिन्वन्ति ते स्वेच्छानुसारं कमपि सामान्यवैकल्पिकविषयम् (GE) अथवा केवलम् अध्ययनशाखाविशिष्टविषयान् (DSEs) एव अध्येतुं शक्नुवन्ति।

सूचना :- चितेषु लघुशोधप्रबन्ध-शैक्षणिकपरियोजना-उद्यमितादिविकल्पेषु सर्वत्र मौलिकं कार्यं भवेत् ***न तु स्नातककार्यक्रमस्य चतुर्थे वर्षे कृतकार्यस्य पुनरावृत्तिः स्यात्।*** अपि च स्नातककार्यक्रमस्य चतुर्थे वर्षे कृतस्य कार्यस्य विस्तारः भवितुम् अर्हति।

क. स्नातकोत्तरकार्यक्रमेषु शोधप्रबन्धलेखनात् अपेक्षिताः परिणामाः -

प्रथमसत्रार्द्धः

अधोलिखिताः चत्वारः परिणामाः प्रथमसत्रार्द्धसमाप्तिं यावत् अवश्यं प्राप्तव्याः -

I. शोधसमस्यायाः अभिज्ञानम्।

II. सम्बद्धसाहित्यस्याध्ययनम्।
III. शोधरूपरेखायाः निर्माणम्।
IV. प्रायोगिकाध्ययनस्य, क्षेत्रीयकार्यस्य (Fieldwork) तत्समकार्याणां वा आरम्भः।

द्वितीयसत्रार्द्धः

अधोलिखिताः चत्वारः परिणामाः द्वितीयसत्रार्द्धसमाप्तिं यावत् अवश्यं प्राप्तव्याः -

I. प्रायोगिकाध्ययनस्य / क्षेत्रीयकार्यस्य समाप्तिः।
II. शोधप्रबन्धसमर्पणम्।
III. अधोलिखितेषु केनचित् प्रकारेण अनुसन्धानस्य परिणामप्रस्तुतिः :-

- मौलिकवस्तु/ मौलिकज्ञानं (Prototype), उत्पादविकासः (Product Development) / स्वामित्वम् (Patent)
- शोधाध्ययनबोर्ड् (B.R.S) इत्यस्याः संस्तुत्या अनुसन्धानपरिषदा स्वीकृतं अन्यत् किमपि शैक्षणिकं कार्यम्।
- प्रतिष्ठितासु शोधपत्रिकासु प्रकाशनम्। यथा - Scopus सूचीबद्धपत्रिकासु, तत्समम् अन्यासु गुणवत्तापूर्णपत्रिकासु वा।
- प्रतिष्ठितप्रकाशकेन प्रकाशितं पुस्तकं, प्रतिष्ठितप्रकाशने कश्चन अध्यायः वा।

ख. स्नातकोत्तरकार्यक्रमेषु शैक्षिकपरियोजनाभ्यः अपेक्षिताः परिणामाः सर्वाः अपि शैक्षिकपरियोजनाः अनुप्रयोगात्मके अनुसन्धाने आधारिताः भवेयुः। ललितकलायाः स्नातकोत्तरकार्यक्रमस्य पुस्तकानुवादं, शोधघटकरहितपरियोजनाः च विहाय सर्वाः अपि शैक्षिकपरियोजनाः अन्वेषणात्मके, वर्णनात्मके वा अनुसन्धाने नैव आधारिताः स्युः।

प्रथमसत्रार्द्धः

अधोलिखिताः चत्वारः परिणामाः द्वितीयसत्रार्द्धसमाप्तिं यावत् अवश्यं प्राप्तव्याः -

I. शोधसमस्यायाः अभिज्ञानम्।
II. सम्बद्धसाहित्याध्ययनम्।
III. शोधरूपरेखायाः निर्माणम्।
IV. प्रायोगिकाध्ययनस्य, क्षेत्रीयकार्यस्य (Fieldwork) तत्समकार्याणां वा आरम्भः।

द्वितीयसत्रार्द्धः

अधोलिखिताः त्रयः परिणामाः द्वितीयसत्रार्द्धसमाप्तिं यावत् अवश्यं प्राप्तव्याः -

I. प्रायोगिकाध्ययनस्य / क्षेत्रीयकार्यस्य तत्समकार्यस्य वा समाप्तिः।
II. शोधप्रबन्धसमर्पणम्।

III. अधोलिखितेषु केनचित् प्रकारेण अनुसन्धानस्य परिणामप्रस्तुतिः -

- मौलिकवस्तु/ मौलिकज्ञानं (Prototype), उत्पादविकासः (Product Development) / स्वामित्वम् (Patent)
- शोधाध्ययनबोर्ड् (B.R.S) इत्यस्याः संस्तुत्या अनुसन्धानपरिषदा स्वीकृतं अन्यत् किमपि शैक्षणिकं कार्यम्।
- प्रतिष्ठितासु शोधपत्रिकासु प्रकाशनम्। यथा- स्कोपस् (Scopus) सूचीबद्धपत्रिकासु, तत्समम् अन्यासु गुणवत्तापूर्णपत्रिकासु वा।
- नीतिप्रारूपनिर्माणं, सम्बद्धमन्त्रालयाय च समर्पणम्।
- प्रतिष्ठितप्रकाशकेन प्रकाशितं पुस्तकं, प्रतिष्ठितप्रकाशने कश्चन अध्यायः वा।
- पुस्तकानुवादः (भाषाविभागीयच्छात्राणां कृते)

संरचना ‘ग’
(स्तरः 6.5): केवलं शोधकार्यक्रमः

सत्रार्द्धः	**प्रधानः पाठ्यक्रमः**	**वैकल्पिकः पाठ्यक्रमः (चितानुसन्धानक्षेत्रसम्बद्धम्)**	**अनुसन्धानस्य विधयः/ उपकरणानि/ लेखनानि च (द्वौ पाठ्यक्रमौ)**	**समस्याधारितं गहनमनुसन्धानम्**	**आहत्य श्रेयोऽङ्काः**
प्रथमः सत्रार्द्धः	एकः प्रधानः पाठ्यक्रमः (चितानुसन्धानक्षेत्रसम्बद्धपाठ्यक्रमः) (4 श्रेयोऽङ्काः)	एकः वैकल्पिकः पाठ्यक्रमः (अनुसन्धानाय चितक्षेत्रेण सम्बद्धः चितक्षेत्रेण समः वा पाठ्यक्रमः) (4 श्रेयोऽङ्काः)	(क) सम्बद्ध-अध्ययनशाखायाः अग्रिमानुसन्धानविधिः + (ख) अनुसन्धानोपकरणानि (2x2 = 4 श्रेयोऽङ्काः)	परिणामाः अस्याः सारण्याः अधः उल्लिखिताः सन्ति। (10 श्रेयोऽङ्काः)	**22**
द्वितीयः सत्रार्द्धः	-	एकः वैकल्पिकः पाठ्यक्रमः **अथवा** अनुसन्धानार्थं चितक्षेत्रेण सम्बद्धः चितक्षेत्रेण समो वा स्वशास्त्रसम्बद्ध-वैकल्पिकविषयः (DSE) (4 श्रेयोऽङ्काः)	अनुसन्धानलेखनप्रविधयः (2 श्रेयोऽङ्काः)	(16 श्रेयोऽङ्काः)	**22**

क) स्नातकोत्तरपाठ्यक्रमस्य प्रथमसत्रार्द्धस्य अधिगमपरिणामाः

प्रथमसत्रार्द्धस्य समाप्तेरनन्तरम् अधोलिखिताः चत्वारः परिणामाः अनिवार्यतया प्राप्तव्याः -

I. शोधसमस्याभिज्ञानम्।

II. सम्बद्धसाहित्याध्ययनम्।

III. शोधरूपरेखायाः निर्माणम्।

IV. शोधस्य प्रथमसोपानम् (उदाहरणार्थं प्रयोगात्मकानुसन्धानस्य प्रारम्भिकसोपानं, पायलट् परियोजनायाः समाप्तिः इत्यादयः)

ख) स्नातकोत्तरपाठ्यक्रमस्य द्वितीयसत्रार्द्धस्य अधिगमपरिणामाः

द्वितीयसत्रार्द्धस्य समाप्तिं यावत् अधोलिखिताः त्रयः परिणामाः अनिवार्यतया प्राप्तव्याः -

I. शोधस्य द्वितीयसोपानं – प्रायोगिकाध्ययनस्य क्षेत्रीयकार्यस्य वा अन्तिमसोपानम्।

II. लघुशोधप्रबन्धसमर्पणं/ परियोजनाप्रतिवेदनसमर्पणम्।

III. अधोलिखितपरिणामेषु न्यूनातिन्यूनम् एकः परिणामः प्राप्तव्यः :-

- वैज्ञानिक-प्रौद्योगिक-अनुसन्धानपरिषत् (CSIR) द्वारा परिभाषितानुसारम् एकस्य मौलिकस्य वस्तुनः ज्ञानस्य (Prototype) वा विकसनम्, अथवा उत्पादस्य (Product) विकसनं यत् प्रौद्योगिकतत्परतास्तरं (Technology Readiness Level) 3/4 (TRL-3 अथवा TRL-4) परिपूरयेत्।
- स्कोपस् (Scopus) सूचीबद्धपत्रिकासु प्रकाशनम्।#
- स्वामित्त्वम् (Patent)
- शोधाध्ययनबोर्ड् (BRS) संस्तुत्या शोधपरिषदा स्वीकृतं किमपि शैक्षणिकं कार्यम्।
- शोधाध्ययनबोर्ड् (BRS) संस्तुत्या शोधपरिषदा अनुमोदितानुसारं च प्रतिष्ठितप्रकाशनेन (राष्ट्रीयेण/अन्ताराष्ट्रियेण) पुस्तकप्रकाशनम्।

प्रकाशनं स्कोपस् (Scopus) सूचीबद्धपत्रिकासु एव भवेत् तथैव लेखकाः स्वयं छात्राः (अनुसन्धातारः) तत्पर्यवेक्षकाश्चैव भवेयुः। प्रकाशने अतिरिक्तलेखकस्य [छात्रं तत्पर्यवेक्षकं च विहाय] योजनं शोधपरिषदः अध्यक्षस्य अनुमत्यैव भवितुमर्हति। शोधस्य द्वितीयसोपानस्य आरम्भात् पूर्वमेव अनुमतिरियम् अनिवार्यतया प्राप्तव्या।

स्नातकोत्तरकार्यक्रमे नमनीयतासौविध्यानि
(Flexibility Provisions in PG)

स्नातकोत्तरकार्यक्रमे नमनीयतासौविध्यविकल्पाः निम्नलिखिताः सन्ति -

- **युगलकार्यक्रमविकल्पाः -** द्वौ शैक्षणिककार्यक्रमौ समकालम् अध्येतुं शक्येते। (यथा - पूर्णकालिककार्यक्रमः मुक्त-दूरस्थ-अधिगमकार्यक्रमः (ODL) च।
- **क्षेत्रकार्यस्य श्रेयोऽङ्काः -** राष्ट्रियश्रेयोऽङ्करूपरेखायाः (NCrF) निर्देशानुसारं पूर्वाधिगमस्य कार्यानुभवस्य च अभिज्ञानं भवति। पाठशालासु गुरुकुलेषु च कृतस्य क्षेत्रकार्यस्य अनुभवाधारितः श्रेयोऽङ्कः प्रदीयते।
- **शैक्षणिकश्रेयोऽङ्ककोषद्वारा (ABC) श्रेयोऽङ्कचरिष्णुता (Credit mobility) –** क्षणिकश्रेयोऽङ्ककोषद्वारा तत्समकक्षैः प्रामाणिकपटलैः च अन्तःशास्त्रीयचरिष्णुतायै (Interdisciplinary mobility) प्रोत्साहनं दीयते।

स्नातकोत्तरकार्यक्रमस्य अन्तःशास्त्रीयसौलभ्यानि
(Interdisciplinary Access in PG)

छात्रेभ्यः निम्नलिखितानि अन्तःशास्त्रीयसौलभ्यानि स्नातकोत्तरकार्यक्रमे प्रदत्तानि सन्ति -

- स्नातकस्तरे पठितेषु प्रधानविषयेषु गौणविषयेषु वा स्नातकोत्तरकार्यक्रमम् अध्येतुं छात्राः शक्नुवन्ति।
- राष्ट्रियस्तरस्य विश्वविद्यालयस्तरस्य वा प्रवेशपरीक्षाम् उत्तीर्य नूतनाध्ययनशाखासु अपि प्रवेष्टुं छात्राः शक्नुवन्ति।
- दर्शनशास्त्रं, भाषाविज्ञानं, इतिहासः, कृत्रिमबुद्धिमत्ता (AI), भारतीयज्ञानपरम्परा (IKS) चेत्यादीनां स्नातकाः संस्कृतस्य संस्कृतशास्त्राणाञ्च स्नातकोत्तरप्रवेशपरीक्षाम् उत्तीर्य संस्कृतविषये संस्कृतशास्त्रेषु च स्नातकोत्तरकार्यक्रमे प्रवेष्टुं शक्नुवन्ति।

स्नातकोत्तरकार्यक्रमात् परम् अनुसन्धानं जीविकोपार्जनं च
(Research and Employability)

स्नातकोत्तरकार्यक्रमात् परम् अध्येता स्वीयं मार्गं द्विधा चेतुं शक्नोति। तत्र प्रथमो मार्गः अनुसन्धाने प्रवृत्तिः। द्वितीयस्तु स्नातककार्यक्रमप्रमाणपत्रेण कुत्रचित् निर्दिष्टेषु विद्यालयेषु/ विश्वविद्यालयेषु/ महाविद्यालयेषु जीविकोपार्जनम्। स्नातकोत्तरकार्यक्रमात् परम् अनुसन्धानाय जीविकोपार्जनाय च इमे अधो दत्ताः अवसराः लभ्यन्ते -

- प्रकाशनाय, नवोन्मेषाय, लघुशोधप्रबन्धलेखनाय च प्रोत्साहनं दीयते।
- जीविकोपार्जनक्षमतावर्धनाय, उद्यमिताकौशलवर्धनाय, सांस्कृतिक-भाषिकक्षमतावर्धनाय च पाठ्यक्रमाः आरचिताः।
- परम्परागताध्ययने, सांस्कृतिकपर्यटने, प्राकृतिकभाषाप्रक्रियायां (NLP), विषयवस्तुविकसने, परम्परागतज्ञानपरामर्शने, नीतिनिर्माणे च अवसरप्रकल्पनम्।
- पाण्डुलिपिविज्ञाने प्रशिक्षणं (यथा - ग्रन्थलिपिः, शारदालिपिः इत्यादयः)
- पारम्परिकस्थलपर्यटनस्य, अङ्कीय-सङ्ग्रहालयानां (Digital Archives), भारतीयज्ञानपरम्पराधारितानां नवोपक्रमाणां (Startups), लिपि-अङ्कीकरणस्य (Script Digitization) च अनुप्रयोगः।
- गुरुकुलानां, रा.शि.नीत्या (२०२०) सह संरेखितसंस्कृतविद्यालयानां, शास्त्रपाठस्य आभासीयमञ्चानां च शिक्षकेभ्यः शिक्षणशास्त्रे प्रशिक्षणम्।

स्नातकोत्तरकार्यक्रमात् परं भाव्यवसराः
(Future Opportunities)

स्नातकोत्तरकार्यक्रमस्य समाप्तेरनन्तरं भाव्यवसराः एवं भवितुमर्हन्ति -

- परम्परागतधारायाम् आधुनिकधारायां वा विद्यावारिधिकार्यक्रमाय (Ph.D.) प्रवेशार्हता।
- विश्वविद्यालयेषु, संस्कृतसंस्थासु, गुरुकुलेषु च शिक्षकपदानाम् अवसराः।
- अङ्कीयमानवताशास्त्रे (Digital Humanities), नीतिशास्त्रे, विज्ञानदर्शनशास्त्रे (Philosophy of Science), सङ्गणकीयभाषाविज्ञानशास्त्रे च अन्तःशास्त्रीयवृत्ति-अवसराः।
- राष्ट्रियस्तरे छात्रवत्तयः (यथा - भारतीयज्ञानपरम्पराविभागपक्षतः (IKS Division), IGNCAपक्षतश्च इत्यादयः)
- पाठ्यचर्याप्रारूपनिर्माणे, अनुसन्धानपरामर्शने, अनुवादविषये च छात्रवृत्तिः (Fellowships)

स्नातकोत्तरकार्यक्रमस्य शैक्षणिकमानदण्डाः गुणवत्ता च
(Academic Standards and Quality)

स्नातकोत्तरकार्यक्रमस्य शैक्षणिकमानदण्डाः गुणवत्ताः च एवं निर्धारिताः सन्ति। ते च -

- श्रेयोऽङ्काः राष्ट्रिय-उच्चशिक्षायोग्यतारूपरेखायाः (National Higher Education Qualification Framework - NHEQF) 6.5 स्तरेण सह संरेखिताः (40 श्रेयोऽङ्काः)
- SGPA/CGPA पद्धत्यनुसारं गुणवत्तापूर्णम् अक्षरसंवलितं (यथा - A, B, C) च श्रेणीनिर्धारणम्।
- कृतिचौर्यनिषेधः (Plagiarism Check), शोधनिष्ठानियमानाम् अनिवार्यरूपेण अनुपालनञ्च।

संस्कृतस्नातकोत्तरकार्यक्रमस्य व्याप्तिः
(The Scope of the Sanskrit PG Programme)

अयं कार्यक्रमः संस्कृतस्य संस्कृतशास्त्राणां च अध्ययनशाखासु स्नातककार्यक्रमसमाप्तेः परं (B.A. Honours/B.A. Honours with Research) साहित्यव्याकरणवेदज्योतिषदर्शनादिषु विषयेषु एकवर्षीयस्नातकोत्तरकार्यक्रमप्रवेशाय अर्हतां परिकल्पयति।

वैश्विकज्ञानकेन्द्रितसमाजस्य अपेक्षाभ्यः प्रतिस्पन्दरूपेण निर्मितः एषः विषयकेन्द्रितः एकवर्षीयः स्नातकोत्तरकार्यक्रमः संस्कृतछात्रान् भारतीयमूलस्य भारतीयपरम्परायाश्च संरक्षकान् (Cultural Custodians), अनुसन्धानान्वेषकान् (Research Innovators), परिवर्तनकारिशिक्षाविदश्च (Education Reformers) कर्तुं सततं प्रयतते।

स्नातकोत्तरकार्यक्रमस्य मूल्याकलनव्यूहः
(Assessment Strategy)

स्नातकोत्तरकार्यक्रमस्य मूल्याकलनाय कश्चन विशिष्टः व्यूहः स्वीकृतः वर्तते। मूल्याकलनव्यूहेऽस्मिन् -

- सततसंरचनात्मकमूल्याकलनस्योपरि (Continuous and Formative Assessments) बलं दीयते।
- अपेक्षितपाठ्यक्रमपरिणामैः सह मूल्याकलनस्य संयोजनं क्रियते।
- अधिगमलक्ष्यरूपेण अनुसन्धाननैतिकतायाः अनुसन्धाननिष्ठायाः च समावेशः क्रियते।
- लघुशोधप्रबन्धस्य वाक्परीक्षा (Dissertation Viva), शास्त्रार्थवादः, परम्परागतशैल्यां सहपाठिभिः समीक्षा (Peer Review) च क्रियते।
- मूल्याङ्कनोपकरणत्त्वेन पाण्डुलिपिसम्पादनं, सङ्गणकीयभाष्यं, शास्त्रसंरेखणम् (śāstra Mapping) इत्यादीनां प्रयोगः।

स्नातकोत्तरकार्यक्रमाणां प्रस्तावितमूल्याकलनरूपरेखा
(Proposed Assessment Framework)

➢ **संस्कृतस्य संस्कृतशास्त्राणाञ्च स्नातकोत्तरकार्यक्रमाणां प्रस्ताविता मूल्याकलनरूपरेखा एवमस्ति -**

मूल्याकलनम् (Assessment)

(क) सत्रान्तपरीक्षाद्वारा मूल्याङ्कनम् -

1. वैकल्पिकप्रश्नोत्तराणि।
2. एकेन वाक्येन उत्तरलेखनम्।
3. लघूत्तरीयप्रश्नाः।
4. दीर्घोत्तरप्रश्नाः।

(ख) सततमूल्याङ्कनम् -

अधोलिखितेषु कानिचित् चत्वारि आश्रित्य मूल्याङ्कनं विधेयम् -

1. कार्यशालासु भागग्रहणम्।
2. प्रदत्तकार्यलेखनम्।
3. पाठ्यविषयाधारेण चलच्चित्रनिर्माणम्।
4. शास्त्रसंजीवनीकार्यक्रमे भागग्रहणम्।
5. वाग्वर्धिनीसभायाम् अधीतविषयप्रस्तुतिः।

****विशेषः** - उपर्युक्तप्रस्तावितमूल्याकलनरूपरेखायाम् अपेक्षितपरिवर्तनानि योजनानि विषयसम्बद्धं परियोजनाकार्यं/प्रायोगिककार्यं (विषयानुगुणं/स्तरानुगुणं/कक्ष्यानुगुणं) वा विश्वविद्यालयः स्वयं निर्णेतुं शक्नोति। इयं प्रस्तावितमूल्याकलनरूपरेखा दिङ्मात्रं निर्देशं प्रददाति।

प्रस्तावितश्रेयोऽङ्कविभाजनम्

(Proposed Credit Distribution)

- **संस्कृतस्य संस्कृतशास्त्राणाञ्च स्नातकोत्तरकार्यक्रमाणां प्रस्तावितं श्रेयोऽङ्कविभाजनं प्रायः एवमस्ति -**

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
		04	0	0	04

****विशेषसूचना** - एतत् श्रेयोऽङ्कविभाजनं केवलं प्रस्तावितमेव। एतस्मिन् श्रेयोऽङ्कविभाजने विश्वविद्यालयः स्वतः निर्दिष्टश्रेयोऽङ्केषु (व्याख्यान-अनुशिक्षण-प्रशिक्षणादिषु) अपेक्षितपरिवर्तनानि कर्त्तुमर्हति। विश्वविद्यालयः स्वीयमूल्याकलनव्यूहान् आश्रित्यैव निर्णयं स्वीकर्त्तुमर्हति।

****Note:** All the courses are already given with a Proposed Credit Distribution, which is purely proposed in nature. The university may assign credits to tutorials/practical as the case may be and according to their assessment strategies.

प्रथमभागः (Part I)

(संस्कृतस्य संस्कृतशास्त्राणाञ्च विभिन्नस्नातकोत्तरकार्यक्रमाः)